শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫

*ৱিরাট্ পুরুষোত্পত্তিপ্রকারৱর্ণনম্*

ৱ্যক্তাৱ্যক্তমিদং ন কিঞ্চিদভৱত্প্রাক্প্রাকৃতপ্রক্ষযে
    মাযাযাং গুণসাম্যরুদ্ধৱিকৃতৌ ত্ৱয্যাগতাযাং লযম্।
নো মৃত্যুশ্চ তদামৃতং চ সমভূন্নাহ্নো ন রাত্রেঃ স্থিতিঃ
    তত্রৈকস্ত্ৱমশিষ্যথাঃ কিল পরানন্দপ্রকাশাত্মনা॥ ১॥

কালঃ কর্মগুণাশ্চ জীৱনিৱহা ৱিশ্ৱং চ কার্যং ৱিভো
    চিল্লীলারতিমেযুষি ত্ৱযি তদা নির্লীনতামাযযুঃ।
তেষাং নৈৱ ৱদন্ত্যসত্ত্ৱমযি ভোঃ শক্ত্যাত্মনা তিষ্ঠতাং
    নো চেত্ কিং গগনপ্রসূনসদৃশাং ভূযো ভৱেত্সংভৱঃ॥ ২॥

এৱং চ দ্বিপরার্ধকালৱিগতা ৱীক্ষাং সিসৃক্ষাত্মিকাং
    বিভ্রাণে ত্ৱযি চুক্ষুভে ত্রিভুৱনীভাৱায মাযা স্ৱযম্।
মাযাতঃ খলু কালশক্তিরখিলাদৃষ্টং স্ৱভাৱোপি চ
    প্রাদুর্ভূয গুণান্ৱিকাস্য ৱিদধুস্তস্যাসসহাযক্রিযাম্॥ ৩॥

মাযাসন্নিহিতোপ্রৱিষ্টৱপুষা সাক্ষীতি গীতো ভৱান
    ভেদৈস্তাং প্রতিবিংবতো ৱিৱিশিৱান্ জীৱোপি নৈৱাপরঃ।
কালাদিপ্রতিবোধিতাথ ভৱতা সঞ্চোদিতা চ স্ৱযং
    মাযা সা খলু বুদ্ধিতত্ত্ৱমসৃজদ্যোসৌ মহানুচ্যতে॥ ৪॥

তত্রাসৌ ত্রিগুণাত্মকোপি চ মহান্ সত্ত্ৱপ্রধানঃ স্ৱযং
    জীৱেস্মিন্ খলু নির্ৱিকল্পমহমিত্যুদবোধনিষ্পাদকঃ।
চক্রেস্মিন্ সৱিকল্পবোধকমহন্তত্ত্ৱং মহান্ খলৱসৌ
    সম্পুষ্টং ত্রিগুণৈস্তমোতিবহুলং ৱিষ্ণো ভৱত্প্রেরণাত্॥ ৫॥

www.prapatti.com

সোঽহং চ ত্রিগুণক্রমাত্ ত্রিৱিধতামাসাদ্য ৱৈকারিকো
ভূযস্তৈজসতামসাৱিতি ভৱন্নাদ্যেন সত্ত্বাত্মনা।
দেৱানিন্দ্রিযমানিনোঽকৃত দিশাৱাতার্কপাশ্যশ্বিনো
ৱহ্নীন্দ্রাচ্যুতমিত্রকান্ ৱিধুৱিধিশ্রীরুদ্রশারীরকান্॥ ৬ ॥

ভূমন মানসবুদ্ধ্যহঙ্কৃতিমিলচ্চিত্তাখ্যৱৃত্যন্বিতং
তচ্চান্তঃকরণং ৱিভো তৱ বলাত্ সত্ত্বাংশ এৱাসৃজত্।
জাতস্তৈজসতো দশেন্দ্রিযগণস্তত্তামসাংশাতপুন-
স্তন্মাত্রং নভসো মরুতপুরপতে শব্দোঽজনি ত্বদবলাত্॥ ৭ ॥

শব্দাদব্যোম ততঃ সসর্জিথ ৱিভো স্পর্শং ততো মারুতং
তস্মাদ্রূপমতো মহোঽথ চ রসং তোযং চ গন্ধং মহীম্।
এৱং মাধৱ পূর্ৱপূর্ৱকলনাদাদ্যাদ্যধর্মান্বিতং
ভূতগ্রামমিমং ত্বমেৱ ভগৱন্ প্রাকাশযস্তামসাত্॥ ৮ ॥

এতে ভূতগণাস্তথেন্দ্রিযগণা দেৱাশ্চ জাতাঃ পৃথঙ-
নো শেকুর্ভুৱনাণ্ডনির্মিতিৱিধৌ দেৱৈরমীভিস্তদা।
ত্বং নানাৱিধসূক্তিভির্নুতগুণস্তত্ত্বান্যমূন্যাৱিশং-
শ্চেষ্টাশক্তিমুদীর্য তানি ঘটযন্ হৈরণ্যমণ্ডং ৱ্যধাঃ॥ ৯ ॥

অণ্ডং ততখলু পূর্ৱসৃষ্টসলিলেঽতিষ্ঠত্ সহস্রং সমাঃ
নির্ভিন্দন্নকৃথাশ্চতুর্দশজগদ্রূপং ৱিরাডাহ্বযম্।
সাহস্রৈঃ করপাদমূর্ধনিৱহৈর্নিশশেষজীৱাত্মকো
নির্ভাতোঽসি মরুতপুরাধিপ স মাং ত্রাযস্ব সর্ৱামযাত্॥ ১০ ॥

**********